Shri Raghunatha Temple MSS. Library,
JAMMU

६११८

No. १८२८ / क

Title: पञ्चस्वरा

Author: प्रजापति दासः

Extent: ४४ पत्र Age: सं. १९५३

Subject: ज्योतिषम्

पंचस्वरा

नं ९२८

२५८


पंचस्वरा

९२२८

नं. ९८ २८ कि
ग्रंथसंख्या
४४ पत्राणि
ज्योतिषम्
ह. १६५३वि

कर्त्ता। प्रजापतिदासः

१५८



6118

F - I - 3
II - 45 → # 34 is doubled.
Total 48

वर्णानां राशिचक्रम्


पुरुष	स्त्री	पुरुष	स्त्री	पुरुष	स्त्री	पुरुष	स्त्री	पुरुष	स्त्री	पुरुष	स्त्री
मेष	वृष	मिथुन	कर्क	सिंह	कन्या	तुला	वृश्चिक	धन	मकर	कुंभ	मीन
चर	स्थिर	द्विस्वभाव	चर	स्थिर	द्विस्वभाव	चर	स्थिर	द्विस्वभाव	चर	स्थिर	द्विस्वभाव
चु चे चो ला ली लू ले लो अ	इ उ ए ओ व वि वु वे वो	क कि कु घ ङ छ के को ह	हि हु हे हो ड डि डु डे डो	म मि मु मे मो ट टि टु टे	टो प पि पु ष ण ठ पे पो	र रि रु रे रो त ति तु ते	तो न नि नु ने नो य यि यु	ये यो भ भि भु ध फ ढ भे	भो ज जि खि खु खे खो ग गि	गु गे गो स सि सु से सो द	दि दु थ झ ञ दे दो च चि
क्रूर	अक्रूर	क्रूर	अक्रूर	क्रूर	अक्रूर	क्रूर	क्रूर	अक्रूर	क्रूर	अक्रूर	क्रूर

अथ नक्षत्राणां वर्णचक्रम्

नक्षत्र	No.				
अश्विनी	१	चु	चे	चो	ला
भरणी	२	लि	लु	ले	लो
कृत्तिका	३	अ	इ	उ	ए
रोहिणी	४	ओ	वा	वि	वु
मृगशिरा	५	वे	वो	का	कि
आर्द्रा	६	कु	घ	ङ	छ
पुनर्वसु	७	के	को	ह	हि
पुष्य	८	हु	हे	हो	डा
आश्लेषा	९	डि	डु	डे	डो
मघा	१०	म	मि	मु	मे
पूर्वफाल्गुनी	११	मो	ट	टि	टु
उत्तराफाल्गुनी	१२	टे	टो	प	पि
हस्त	१३	पु	ष	ण	ठ
चित्रा	१४	पे	पो	र	रि
स्वाती	१५	रु	रे	रो	ता
विशाखा	१६	ति	तु	ते	ता
अनुराधा	१७	न	नि	नु	ने
ज्येष्ठा	१८	नो	य	यि	यु
मूला	१९	ये	यो	भ	भि
पूर्वाषाढा	२०	भु	धा	फा	ढा
उत्तराषाढा	२१	भे	भो	ज	जि
अभिजित	२२	जु	जे	जो	खा
श्रवण	२३ 22	खि	खु	खे	खो
धनिष्ठा	२४ 23	ग	गि	गु	गे
शतभिषा	२५ 24	गो	स	सि	सु
पूर्वभाद्रपद	२६ 25	से	सो	द	दि
उत्तरभाद्रपद	२७ 26	दु	थ	झ	ञ
रेवती	२८ 27	दे	दो	च	चि

द्वादश भाव

लग्नादि व्यय पर्यंत, राशी चक्र म्



— दृष्टि चक्रम् —

पाद १	पाद २	पाद ३	पाद ४	
३ १०	५ ९	४ ८	८	
श॰ पूर्ण	जी॰ पूर्ण	मं॰ पूर्ण	सं पूर्ती की पूर्ती	

राशि(णां) अंकाः वृषादि गणना और अंतमें मेषराशिः

आत्मा (अ)	कर्म (इ)	आधार (उ)	पिंड (ए)	छिद्र (ओ)
मे० राशि(णां) १२ अंका सिं० ४ वृ० ७	अंक० कं० ५ मि० २ कं ३	अंक० ध० ८ मी० ११	अंक० तु० ६ वृ ९	अंक० म० ९ कुं० १०



श्री० ॐश्रीगणेशायनमः हेरम्बंप्रणिपत्यविघ्नद
१ मनंवाणीमथोभास्करम् ब्रह्मविष्णुशिवान्स्व
शक्तिसहितान्सर्वेश्वरींकालिकांध्यात्वा तां
हृदिवालवोधनकरींटीकांप्रकुर्वेमुदे सर्वेषां
चप्रजापतिकृतेग्रन्थेवयोनिश्चिते १ अत्रग्र
न्थादौनिर्विघ्नेनग्रन्थसमाप्त्यर्थमभिमतदेवता
नतिरूपंमंगलाचरणमनुष्टुभाह इष्टदेवमि

ॐश्रीगणेशायनमः। इष्टदेवंनमस्कृ
त्यगोपालंकुलदेवतं श्रीप्रजापतिदासे
नक्रियतेग्रन्थसङ्ग्रहः १ नवग्रहंनम
स्कृत्यदेवींचैवसरस्वतीं प्रणिपत्यगु
रुंकिंचिज्ज्योतिर्ग्रन्थंवदाम्यहम् २॥

ति। मयाश्रीप्रजापतिदासेन ग्रन्थसंग्रहः ग्र
न्थस्यपंचस्वराख्यस्यग्रन्थस्यसंग्रहः सम्यक्
प्रकारेणशुभाशुभनिर्णयः वालकरिष्टायुर्दाय
निर्णयाद्यरिष्टविचारपूर्वकग्रहाणांत्रिपताकी
केतुपताकीकेतुकुंडलीविचारानुकूलवर्षे
शादशान्तर्दशादिविचारेणशुभाशुभसंग्रहः।
क्रियते किंकृत्वागोपालंनमस्कृत्य कथंभू
तंगोपालंकुलदेवतं १ अथाचार्यःविघ्नवा

ङ्गल्यतया पुनर्म्मंगलमाचरत्यनुष्टुपूछन्दसा
ह नवग्रहानितिस्पष्टम् २॥ ॥ अथस्ववंशा
नुरूपणंकरोति । सद्वैद्येति सद्वैद्यकुलजातेन
मयाऽयंपरिहारःकृतः परिहारःशंकानिवृत्तिक
उपकारः केषुसर्वेषुज्योतिर्वित्सु च वराहेति
यत्किंचिन्मया अत्रक्रियते तद्वराहकृतसूत्रंस
म्यक्ज्ञात्वा तदनुकूलंक्रियते तज्ज्योतिर्विंदः ग्र

सद्वैद्यकुलजातेन परिहारःकृतोमया।
ज्योतिर्वित्सुच सर्वेषु ब्राह्मणेषुविशेषतः
च वराहकृतसूत्रेण यत्किंचित्क्रियते
मया ज्योतिर्विंदःप्रपश्यन्तुग्रहाणांसु
विचारतः ४ पंचस्वराभिधानंतुग्रंथं
निधनसंश्रयम् किंचिदुद्देशगम्यंच
स्वल्पंवक्ष्यामिसास्वती ५ ॥ ॥ ॥

हाणांसम्यग्विचारेणपश्यंतु ४ अथग्रन्था
भिधानमनुष्टुपूछंदसाह पंचस्वरेति इदंपं
चस्वराख्यंग्रंथंस्वल्पंकृत्वा पुनः किंचिदुद्देश
गम्यंगुरुमुखाच्छ्रुत्वा वक्ष्यामि कथंभूतंग्रंथं
निधनसंश्रयं निधनंमृत्युनिर्णीतंयत्रतत् ५ ॥

स्त्री· २

अथाचार्यः पूर्वाचार्यकृतेषु ग्रंथेषु दोषं दर्शय न्नाह । ज्योतिर्विद्भिरिति पुरा पूर्वं सर्वैर्ज्योतिर्विद्भिः राशिचक्रे तन्वादिद्वादशभावानां निर्णयविस्तरं कृतं तेषां ग्रंथेषु भावानां फलमेवस्थितमिति ६॥ धर्मेतितेक्रमतयोधर्मकर्मसुखंडः खंदारपुत्रादिविचारं वङ्कधावृथावलय

ज्योतिर्विद्भिः पुरा सर्वैः कृतं निर्णयविस्तरं ।
तन्वादिव्ययपर्य्यन्तं राशिचक्रे व्यवस्थितं ६॥
धर्मकर्मसुखंडःखं मृत्यादिसुतवान्धवान् तन्नबुध्वाक्रमतयो वर्णयंतिवृथावृथा ७
अपाश्यमरणं जीवेष्वपश्यंति शुभाशुभम् मरिष्यतियदादैवात्कोमुक्तो हि शुभाशुभं ८

निवदन्तीत्यर्थः किंकृत्वा तं मृत्युदमरिष्टं अबुद्धानिर्णयमकृत्वेत्यर्थः ७ अथाचार्यस्तेषां दोषं स्पष्टयति अपाश्येति तत्र द्वादशभावविचारे मरणं जीवनं चापाश्य त्यक्त्वा शुभाशुभं कथयंति यदा दैवात् जातो मरिष्यति तदा तत्कथितं शु

भास्तुर्मंकोभुंक्ते नकोपीत्यर्थः ८॥ अथशास्त्र
स्यग्रंथप्रयोजनमाह उक्तंच। सर्वस्यैवहिशा
स्त्रस्यकर्म्मणोवापिकस्यचित् यावत्प्रयोजनंनो
क्तं तावत्तत्केनगृह्यत इति तस्मादिति तस्मात्का
रणात् सर्वप्रयत्नेनायुःस्थानंमृत्युस्थानंविद्वा
नविचारयेत् वालस्यजन्ममात्रेणजंन्मकालजा

तस्मात्सर्वप्रयत्नेनह्यायुःस्थानंविचिंतये
त् वालस्यजन्ममात्रेणजन्मारिष्टंविचिंत
येत् ९ चतुर्विंशतिवर्षाणियावद्गच्छंति
जन्मतः तावद्रिष्टंविचिंतव्यमायुर्दायंवि
चिंतयेत् १०॥

नमात्रेण जन्मारिष्टंजन्मकालजनितारिष्टंविचा
रयेद्दिति ९ अथारिष्टप्रमाणमाह चतुर्विंश
तीति तत्रतावदाचतुर्विंशतिवर्षंजन्मतश्चतुर्विं
शति वर्षपर्य्यन्तं त्रिपताकीचक्रेवालस्यारिष्टं
निश्चित्य सम्यक्ज्ञात्वावदेत् तत्तवक्ष्यमाणमा
युर्द्दायंविचिंतयेदिति एतन्ममतं १०॥ ॥
अथमतान्तरमाह। नवनेत्राणीति केचित्तुया
वत् जन्मतोनवनेत्राणिउनत्रिंशन्मितानिवर्षाणि

गच्छंति यावत्तावदुत्पन्नरूपमरिष्टं विचारणीयमि
ति ॥ अथ वेधविचारणार्थं त्रिपताकीचक्रोद्धार
३ माह । ऊर्द्धेति प्रागग्रा उदग्रास्तिस्रो रेखा लेखयि
3 त्वा तदग्रेषु द्वाभ्यां द्वाभ्यां रेखाभ्यामारभ्य आग्नेया
दिवायव्यांताः ऐशान्यादिनैऋत्यांतास्तिर्यग्रेखाः
षट् लिखेदित्युत्तरेणान्वयः १२ ॥ षड्रेखेति । एवं

नवनेत्राणि वर्षाणि यावद्गच्छंति जन्मतः ।
तावद्रिष्टं विचिंतव्यं उत्पन्नरूपं न चान्यथा ॥
ऊर्द्धरेखात्रयं लेख्यं तिर्यग्रेखात्रयं तथा वे
धस्तिर्यक्क्रमाद्देयो द्वाभ्यां द्वाभ्यां परस्परं १२
षड्रेखास्तु समालेख्याः पताकीवेधनिर्णये
रव्यादिग्रहवेधेन जन्मारिष्टं विधीयते १२

पताकीचक्रे वेधनिर्णयार्थं षड्रेखाः समालेख्याः
सूर्यादिग्रहवेधवशेन बालानां जन्मारिष्टं जात
कविद्भिर्वराहादिभिर्विधीयते निर्णीयते इत्यर्थः
उक्तं च स्वरपंचाशिकायां तिर्यक्तिस्रश्चोर्द्धरे
खास्तिस्रः षट् षट्रेखास्तच्छिरोगा व्यधार्थमि
ति १३ ॥ ॥ ॥ ॥ ॥ ॥


अथत्रिपताकीचक्रे ग्रहस्थानंचयथाभवतित
थाह। ग्रहदानइति। तावत्पूर्वं ग्रहदानकाले
ग्रहस्थापनेआदौप्रथमंमेषंमेषराशिंअंतेअं
तस्थंगेलिखेत्. अयंभावः दक्षिणादिगाश्रित
प्रागग्ररेखाग्रतो द्वादशरेखाग्रेषुमेषादिराशयो
लेख्याः तदुक्तंमेषं मध्येतोखिलक्षीणि मार्गी।

ग्रहदानेविचारेचअन्तेमेषंविनिर्दिशेत्
वेदादिघंकदानेचमध्येमेषंसुनिश्चितं १४
कलशाद्द्वंद्वपर्य्यन्तमंकदानंसुनिश्चितं।
उच्चस्थानग्रहाणांचरव्यादीनांयथाक्रमा
त् १५

ज्ञातव्यानि त्रैपताकाख्यचक्रे पुनर्वेदाद्यंक
दानकाले अंकस्थापनेमेषं मेषराशिंमध्ये
मध्यरेखायांलिखेदिति १४ ॥अथराशिच।
क्रेअंकस्थापनमाह। कलशादिति। कल
शात्कुंभराशिमारभ्य द्वंद्वपर्यन्तं मिथुन
पर्य्यंतं अंकदानं अंकस्थापनं वराहादिभिः

अत्रैतत्यं विचारणीयं यथाक्रमं नाम प्रत्येक समुख वाम दक्षिण वेधे सति यथान्यायं नाम रव्यादीनां ग्रहाणां उच्च नीच वक्रादि वशात् वर्षभागं वा वर्ष मासदिन अंकमानेनातिथं विनिर्दिशेत्

पं.ख. सुनिश्चितं कथितमित्यर्थः ततोरव्यादीनांग्रहाणां
४ उच्चस्थानेस्थितानां अर्थादुच्चस्थानादिषु यथाक्र
५ मादुच्चसमनीचेषुस्थितानांग्रहाणां यथाक्रमे
णांकसंख्याज्ञेया अयंभावः उच्चराशिस्थितस्यग्र
हस्यांकसंख्याविचारेस्थानत्रयांकसंख्यांमेलयित्वा
तदंकतुल्यदिनसंख्याज्ञेया एवंसमस्थानेस्थित
स्य द्वयोः स्थानयोः समाधिस्थयोरंकौमेलयि
त्वांकतुल्यमाससंख्याज्ञेया एवमेवनीचादि।
स्थितस्यग्रहस्य तत्रस्थांकस्यैववर्षसंख्याज्ञेया।
एवंशुभग्रहकृतवेधे पापकृतवेधेतुविपरीतंज्ञे
यं तदुक्तं ग्रहाणांवलान्निर्दिशेत् एतदुक्तं समे
विचारेपुष्टमध्याल्पवीर्यैर्द्युमासाचसंख्याविलो
मेनसौम्यैः शुभस्थानयोगेत्रणासमस्थैश्चसद्ग्र
हयोगेत्रणाद्यैर्दिनानिविमिश्रेणमासावलातार
तम्यमिति १५ ॥ ॥ ॥ ॥ ॥ ॥



अथांकान्याह। वेदेति वेदाः कुंभराशौ चतुःसंख्याकमंकं लेख्यं कुंभराशेः सन्मुखे मिथुनराशौ पंचसंख्याकमंकं लेख्यं पुनः कुंभराशेर्लांगलवेधक्रमेण तिर्य्यग्रेखाग्रे कन्यायां नखा विंशति २० लेख्या एवमेव मकरराशौ वह्निस्त्रयो लेख्या मकरस्य सन्मुखे कर्कराशौ अष्ट ८ लिखनीयाः पुनः पूर्ववल्लांगलदंडक्रमेण तिर्य्यग्रेखा

वेदपंचनखान्दत्वा वह्न्यष्टसमयं तथा।
भुवनं युगलं चैव दश दद्यात्तथैव च १६


ग्रे तुलायां समयं ऋतुसंख्यं षट् संख्याकमंकं लेख्यं पुनर्धनुषि भुवनं १४ चतुर्दश लेख्या। तत्सम्मुखे सिंहराशौ युगलं २ द्विसंख्याकमंकं लेख्यं ततः पूर्ववत्तिर्य्यग्रेखाग्रे वृश्चिकराशौ दश १० लेख्या इति तदुक्तं वेदवह्नीरुद्रदिक तर्कनखवाङ्काः गजाः शराः अंकादेयाः क्रमादेते कलशादौ विपर्य्ययादिति १६ ॥ ॥ ॥ ॥

पं·स्व· मेषादीति मेषादिराशीनां नामभिस्त्रिपताकीच
५ क्रे नामाक्षरैर्द्वादशरेखाग्रस्थितैर्जन्मकालीनग्र
5 हयुक्तानि कुर्यात् एकरेखायां स्थिते खेटे ग्रहे स
मागते सति स्थानत्रयेषु वेधनिश्चयो निश्चये
नवेधो ज्ञेयः १७ ॥ अथ वेधविचारक्रममाह। ल
ग्न इति एवं त्रिपताकीचक्रं निष्पाद्य तत्र चक्रे तत्र
राशौ बालस्य कस्य जन्मलग्नमस्ति तत्स्थिति क्रमा
देव वेधविचारः कार्यः तत्रक्रमः प्रथमं ग्रहदा।

मेषादिराशिचिह्नानि ग्रहयुक्तानि कारये
त् एकरेखास्थिते खेटे त्रितये वेधनिर्णि
यः १७ लग्ने वा दक्षिणे वामे संमुखे ग्रह
संयुते दण्डज्ञेयं शिशोरिष्टं दिनं मासं च
हायनम् १८

ने विचारे च अन्ते मेषं विनिर्दिशेदित्यादिप्रकारे
ण पूर्वोक्तग्रहस्थानचक्रे यत्र कुत्रपति तं ज
न्मलग्नं निश्चित्य ततो जन्मकालीनारव्यादयो
ग्रहा यत्र यत्र स्युस्तत्र तत्र त्रिपताकीचक्रे लेख्याः
अस्मिन्नेव चक्रे वेधविचारः सुधिया कार्यः त
त्र विचारक्रमः लग्न इति सप्तमी पंचम्यर्थे अ
र्थाज्जन्मलग्नात् तद्दक्षिणे दक्षिणास्थिततिर्यं

ग्रेखाग्रदंडे ग्रहे सति वेधो ज्ञातव्यः एवं वामस्थि
ततिर्यग्रेखाग्रदंडे वेधो ज्ञातव्यः तथैव सम्मुखे
सम्मुखरेखाग्रदंडे वेधो ज्ञेयः एवं वेधत्रयं ज्ञा
त्वा यत्र दक्षिणवामादिरेखाग्रदंडे ग्रहो भवेत्ते
न वेधः स्यात् यद्दंडस्थितेन ग्रहेण वेधः कृत
स्तद्दंडस्थितराश्यंकं पूर्वोक्तांकदानत्रिपता
कीचक्रादंकं मेलयित्वा ग्रहस्थापनचक्रे तस्मि



कर्के धनुषि मी
ने हरि कीटे घटे
तथा कन्यायां
मकरे जूके तुला
मी नां गनास्तु च ॥९॥

न्नेव दंडे लेख्यं तदंकतुल्ये वर्षे मासे दिने च शि
शोर्वालकस्यरिष्टमरिष्टं ज्ञेयमिति ॥८॥ ॥
अथ चतुर्भिः श्लोकैः कर्कादिस्थग्रहैर्वेधक्रमं।
स्पष्टयति कर्के इति। तत्र कर्के कर्कराशौ ध
नुषि धनूराशौ मीने च ग्रहे सति परस्परं वेधो जा
यते एवमेव हरौ सिंहराशौ कीटे वृश्चिकराशौ
कुंभे च ग्रहे सति परस्परं वेधः एवमेव कन्यायां

पं·स्व· मकरे तुलयां तुलाराशौ च ग्रहे सति परस्परं वे
६ धः तत्रैकराशौ ग्रहे सति द्वयोः संमुखतिर्यी
ग्रेखायोर्जन्मलग्ने सति वेधो जायते अनेनैव
6 क्रमेण तुलामीनांगनासु तुलादिराशिषु ए
कत्र ग्रहे सति अन्यतमे जन्मलग्ने सति वेधो ज्ञे
यः १९॥ ॥ वृश्चिक इति । तथा लोके नैव स
र्वत्र वेधो ज्ञायते शिष्याणां बोधाय पुनः सर्वेरा।

वृश्चिके घटसिंहे च धनुर्मकरकर्कटे
मकरे च धनुः कन्ये घटसिंहे च वृश्चिके
२०

शीन् विवृणोति वृश्चिके ग्रहे सति घटसिंहयो
र्वेधो ज्ञायते एवं धनुषि ग्रहे सति मकरकर्क
टयोर्मध्ये यत्र जन्मलग्नं तत्र वेधः तथा मकरे
मकरराशौ ग्रहे सति कन्यातुलयोर्जन्मलग्न
वशाद्वेधो जायते एवमेव घटकुंभराशौ ग्र
हे सति सिंहवृश्चिकयोर्वेधः २०॥ ॥ ॥

मीनइति अत्राचार्य्येण कर्कादिमीनपर्य्यंतम
न्यतमे जन्मलग्नेसति द्वयोर्द्वयोराश्योः स्थिता
नां ग्रहाणां वेधउक्तः तथैवमेषादिराशित्रितये
षुजन्मलग्नेसति सम्मुखवामदक्षिणस्थः त्रिषुरां
राशिषुस्थितग्रहाणां वेधः कथितः शेषंस्पष्टं २१
मिथुनइति । अयंपताकीसंज्ञकोवेधः समुदाये
राशिचक्रे यथाक्रमेण जन्मलग्ने रव्यादिग्रहवशा
द्वेयोज्ञेयः २२ त्रितयइति । अत्रत्रिपताकीचक्रेत्रि

मीनेचकर्कटेज्रूकेमेषेकन्याधनुर्ज्झषः
वृषेसिंहेचकुंभेच वृश्चिकेचविनिर्दिशेत्
२१ मिथुनेमकरेज्रूकेकर्कटेचविनिर्दि
शेत् पताकीवेधसंज्ञोयंसमुदायेयथाक्र
मम् २२ त्रितयेत्रितयेज्ञेयंदिनंमासंचहा
यनं यथायोगंयथान्यायंयथाभागंविनि
र्दिशेत् २३ ॥

तयेत्रितयेज्ञेयं अर्थाद्राशित्रयात्मके वेधेज्ञातेस
ति रव्यादिग्रहाणां वलवशाद्यथायोगं यथान्या
यं यथाभागंविनिर्दिशेत् कथयेत् कथंवदे।
त्तदाह यथायोगंसम्मुखवामदक्षिणवेधयोग
वशाज्जन्मलग्नेवेधेसति यथान्यायं रव्यादि
ग्रहाणां उच्चनीचवक्रादिवशात् यथाभागंव

पं·स्व· षिमासदिनेष्वंकमानेनारिष्टंविनिर्दिशेत् कथ
७ येत् २३ अथांकसमुच्चयमाह एकोनेतिक
र्केकर्कराशौवेधेसतिराशित्रितयस्थितानां अं
कानामेकोनविंशति संख्याकेन १९ वालस्या
रिष्टंवक्तव्यं एवमेवसिंहेसप्तदश १७ संख्येना
निष्टंज्ञेयं एवंकन्यायांवेधेसतिषट्त्रिंशत् ३६
तथातुलायांवेधेसतिषट्विंशकोज्ञेयः ॥२४॥


एकोनविंशतिः १९ कर्केसिंहेसप्तदश
१७ स्मृताः षट्त्रिंशच्चैवकन्यायां ३६
तुलायामंगविंशतिः २६ ॥ २४ ॥ वृश्चि
केसिंहवज्ज्ञेयं १७ नवयुग्मंधनुर्धरे
२९ मकरेरसयुग्मानि २६ कुंभेसप्तद
शैवतु १७ ॥ २५ ॥

वृश्चिकइति वृश्चिकेवेधेसति सिंहवत् पू
र्वोक्ता सप्तदशांकसंख्यैवज्ञेया तथाधनु
षिवेधेनवयुग्मं २९ ऊनत्रिंशदित्यर्थः म
करेवेधेरसयुग्मं २६ षड्विंशकं कुंभेवे
धेसति सिंहवृश्चिकवत् सप्तदशासंख्याज्ञेया १७
॥ २५ ॥

नवयुग्ममिति। तथैवमीने ऊनत्रिंशन्नव
विंशत् २९ पुनर्मेषेवेधेसति षोडश १६ मि
तासंख्याज्ञेया तथावृषेवेधेसति सिंहवत्
सप्तदश १७ संख्याज्ञेया पुनर्मिथुनेवेधेसति
नवत्रिकं ऊनचत्वारिंशन्मिता ३९ संख्याज्ञेया
॥२६॥ पूर्वमितिश्लोकः स्पष्टार्थः ॥ २७॥ ॥

नवयुग्मं २९ तथामीने मेषेचैवतुषोड
श १६ वृषभेच १७ तथासिंहे मिथुने
चनवत्रिकं ३९ ॥२६॥ पूर्ववेदादयोयें
कास्त्रिषुस्थानेषुकीर्तिताः तेषांलांगल
वेधेस्मिन्नेकीकृत्यप्रकीर्त्तिताः ॥२७॥
यर्थांकोदृश्यतेमासंदिनंवर्षंतथैवच।
ग्रहाणांचवलंबुद्धापूर्वोक्तंतुविनिर्दिशे
त्॥२८॥

यर्थांकइति। यथाराशित्रयेंकोदृश्यते त
थैवग्रहाणांरव्यादिग्रहाणां वक्ष्यमाणप्रका
रेण वलावलंबुध्वा वर्षं मास दिनेषु पूर्वो
क्तवत् पृथगंकमानेननवांकानामैक्येनचव
र्षमासदिनेष्वरिष्टंज्ञेयमिति ॥ २८॥ ॥ ॥



अथखव्यादीनांवलावलमाह ग्रंथांतरे। कु।
जस्तुक्रवुधेंदर्की सौम्यस्तुक्रावनीभुवां जीवा
र्कि भानुजेज्यानां क्षेत्राणि स्युरजादयः १ स्वक्षे
त्रस्थेवलंपूर्णं पादोनंमित्रभेस्थिते अर्द्धंसम
ग्रहेज्ञेयं पादंशत्रुग्रहेस्थिते २ एतदुक्तंवलंसौ
म्येक्रूरेज्ञेयंविपर्य्ययात् ॥अथपापग्रहविशेषः
शत्रुगेहस्थितेपूर्णंपादोनंसमवेश्मनि अर्द्धंमि।
त्रग्रहेज्ञेयंपादंपापेस्ववेश्मनि ३ अथग्रहा।
णांराशिभोगः॥ मूवर्षंहिवृहस्पतेर्निगदितंमा
र्द्धद्वयंभास्करेः पादंवासरयुग्मकंहिमतनोः प
क्षत्रयंभूमिजे षड्विंशानिदिनानिदानवगुरोर्द्वा
विंशरात्रिंवुधे षण्मासंचसवत्सरंरविसुतोर्मा

संतथाभास्करे ४ अथोदयादिलक्षणमाह।
सूर्यमुक्ताउदीयंते शीघ्राअर्केद्वितीयगे स
मास्तृतीयगेज्ञेयामंदाभानोचतुर्थगे ५ वक्राः
स्युःपंचषष्ठेर्केत्वतिवक्रानगाष्टगे नवमेदश
मेभानोजायतेकुटिलागतिः ६ द्वादशैकादशे
सूर्यंभजतेशीघ्रतांपुनः अदृश्यतांपुनर्लोकेव्रजं
त्यर्कगताग्रहाः ७ अथक्रूरसौम्यविचारः श
न्यर्कराहुकेत्वाराः क्रूराःशेषाःशुभाग्रहाः क्रू
रयुक्तोबुधःक्रूरःक्षीणचंद्रस्तथैवच ८ क्रूराव
क्रामहाक्रूराःसौम्यावक्रामहाशुभाः सहजांस्युः
स्वभावस्थाःसौम्याःक्रूराश्चशीघ्रगाः ९ वक्रोच्च
गःस्वधर्मेषुवीर्यौभवेद्ग्रहः तदग्रपृष्ठभागे
सुबलंत्रैराशिकंमतं १० अथरव्यादीनामुच्चस्था
नान्याह। मेषोवृषोमृगःकन्याकर्कोमीनतुला।
लोकमात् आदित्यादिग्रहेपूर्वंनीचंतस्माच्चस
प्तमं ११ उच्चनीचाच्चतुर्थंयत्समस्थानंतदुच्यते
उच्चस्थंमध्यमंनीचंत्रिधाचक्रेव्यवस्थितं १२।
स्वोच्चांशस्थेबलंपूर्णंनीचांशस्थेदलंबलं त्रैरा
शिकवशातज्ञेयमन्तरेचबलंबुधैः १३ ग्रहाः
सौम्यास्तथाक्रूरावक्रमार्गीच्चनीचगाः स्था
नानिबुध्वाइत्येवंबलंज्ञात्वाफलंवदेत् १४।

विघ्नं

पं·स्व· वक्रग्रहे फलं द्विघ्नं स्वोच्चसंस्थिते स्वभाववर्जं फ
९ लं शीघ्रे नीचस्थेर्द्धफलप्रदः १५ त्र्यंशं त्रिको
१ णं चतुरस्त्रमस्तं पश्यन्ति खेटाश्चरणाभिवृद्ध्या
मंदो गुरुर्भूमिसुतः परे च क्रमेण संपूर्णदृशो भ
वंति १६ ॥ ॥ रवींदुसितसौम्यास्तु बलिनः पू
र्णवीक्षणे सुराचार्यस्त्रिपादे च कुजः पादद्वये
बली एकपादे तथा सौरी वीक्षणाद्बलमीरितमि

सबले च ग्रहे पापे दिनमात्रं विधीयते ।
मध्यबले तथा मासं वर्षं चैव तथाबले
॥२९॥

ति २९ अथ वर्षादिनिर्णयमाह सबल इति
वेधकारके पापग्रहे सबले बलयुक्ते सति दि
नमात्रमरिष्टं विधीयते वराहादिभिः कथ्य
ते तथैव वेधकारके पापग्रहे मध्यबले सति
मासं माससमात्रेणारिष्टं कथ्यते तथैव वेधका
रके पापग्रहे अबले बलरहिते सति पूर्वाचा
र्यैर्वर्षमानमुक्तं २९ ॥ ॥ ॥ ॥ ॥

अथशुभग्रहस्यवेधेविशेषमाह बलान्वि।
तइति बलयुक्तेनशुभग्रहेणवेधेकृतेसति
यथातथांकप्रमाणेन वर्षं विंद्यात् वर्षमा
नेनारिष्टंवदेत् पुनः शुभग्रहेमध्यबलेसति
तथैवमासंअंकतुल्यमाससमानेनारिष्टं तथैव
क्षीणशुभग्रहेबलरहितेसति दिनमंकतुल्य

बलान्वितेशुभेवापि वर्षं विंद्याद्यथा
तथा मध्येबलेतथामासं क्षीणेचैव
तथादिनम् २० पापग्रहयुतेलग्नेदृ
ष्टेवाशत्रुणातदा तदादिनंभवेत्तस्यम
रणायसुनिश्चितं २१ ॥ ॥ ॥ ॥

दिनमानेनारिष्टंज्ञेयमिति २० पापेतिज
न्मलग्नेपापग्रहयुतेसति पुनः शत्रुणायु
तेसति वादृष्टेसति वालस्यतद्दिनंअंकमा
नतुल्यदिनंमरणायसुनिश्चितंनिश्चयेनज्ञे
यमिति २१ ॥ ॥ ॥ ॥ ॥ ॥

पं.स्व. तुल्येति यत्रजन्मलग्नेहृद्योः शुभाशुभयोस्तुल्यदृ
१० ष्टिर्भवेत्तदाहृयोर्ग्रहयोर्वलावलंज्ञात्वा मासमाने
10 नीकतुल्येनारिष्टंज्ञेयं तत्रेयंव्यवस्थाशुभग्रहे
वलवतिसतिपापग्रहेनिर्वलेसतिमासंज्ञेयं अ
न्यथादिनानि तदुक्तं अस्तग्रहेयोगेक्षणाद्यैर्दि

तुल्यदृष्टिर्भवेद्वापितुल्ययोगोभवेद्य
दि तदामासंविधातव्यंग्रहाणांचवला
वलैः ३२ शुभदृष्टेशुभैर्युक्तेशुभस्था
नगतेपिवा तदावर्षंविजानीयात्स्वामि
नावापिवीक्ष्यते ३३ ॥ ॥ ॥ ॥

*उदितः स्वगृहस्थश्च मित्रगेहे गतोपिवा। मित्रवर्गे
मित्रदृष्टःसग्रहः सवलः स्मृतः ३४
स्वामिना वलिना दृष्टः सवलैश्च शुभ ग्रहैः न दृष्टो नयुक्तो
पापैः सग्रहः सवलः स्मृतः ३५

नानिविमिश्रेमासावलातारतम्यमिति ३२ ॥
शुभदृष्टइति शुभग्रहवेधेसति पुनःशुभग्रहे
रेवदृष्टे पुनःराशिशुभस्थानेजन्मलग्नेशुभग्रह
स्यक्षेत्रमितियावत् तदावर्षमंकतुल्यंवर्षमाने
नारिष्टंज्ञेयं अथवाशुभग्रहवेधेसति जन्मलग्ने
स्वामिनायुतदृष्टेपितथैववर्षंज्ञेयमित्यर्थः त

इत्युक्तं शुभस्थानयोगेत्तणाद्यैः समाप्ते इति ३३
अथाशुभग्रहदृष्टिवशाद्विशेषमाह अशुभमि
ति यदार्द्दंडेशेपापग्रहे सति पुनः क्षीणनीचा
रिग्रहस्थानत्वान्निर्वले सति यथाजन्मलग्नेपा
पग्रहयुते सति दिनानामवधिः प्राप्तिर्जायते
तत्र यदि शुभग्रहाबलिनः शन्तोल्लग्नं पश्यंति
तदा वर्षाणीति वर्षाणामवधिं योजयेत् ज्ञातव्या ३४

अशुभं दंडसंयुक्तं क्षीणं पापयुतं यदि ।
शुभग्रहाश्च पश्यंति तत्र वर्षाणि योजये
त् ३४ वर्गोत्तमे थ तुंगे वा केंद्रे वा गुरुभा
र्गवौ तदापि प्रबले पापे वर्षभोगो न लं
भ्यते ३५ ॥

अथ विशेषेण दिनानामवधिं दृष्टयति वर्गो
त्तम इति यदि गुरुभार्गवौ वर्गोत्तमे वर्गोत्तमन
वांशे वा तुंगे स्वोच्चे भूत्वा केंद्रे पि स्यातां तथा वे
धकारके दंडेशे च पापग्रहे प्रबले बलोत्कटे
सति तदा वर्षभोगो न लभ्यते वर्षावधिर्न जाय।
ते अर्थाद्दिनानां मध्ये ऽरिष्टं ज्ञेयमिति ॥ ३५ ॥

पं·स्व· अथान्यदाह विद्धइति ऋक्षत्रयसंस्थितैर्ग्रहै
११ र्जन्मलग्नेविद्धेसति दिनमात्रमेवारिष्टंस्त्रेयं ८
तन्नममममतं यदुक्तं तत्सर्वदाशिशोर्वालस्या।
रिष्टंस्तेयमितिदिक् ३६ अथार्द्धयामेदंडेशाव
शाद्वेधेपरिहारमाह शुभमिति शुभग्रहस्य

विद्धे तत्तत्रये ऋक्षे दिनमात्रं विधीयते
नैतदुक्तं ममममतं शिशोरिष्टं तु सर्वदा
३६ शुभे च दंडसंयोगे सर्वत्र पापव
र्जिते वालस्य कुशलं सर्वं शुभैर्यदि
समन्विते ३७ ॥ ॥ ॥ ॥

दंडेसति तथा सर्वत्र पापवर्जितेवेधकारका
र्द्धयामेशयोरपिपापत्वाभावे पुनर्जन्मलग्ने
शुभग्रहयुतेक्षितेसति सर्वसर्वथाकुशलं
वदेत् नत्वरिष्टमिति ३७ ॥ ॥ ॥ ॥

अथार्द्धयामेशादंडेशयोः पापत्वेविशेषमा
ह अस्तुभमिति पापग्रहस्यदंडेसतिपुनः
सर्वत्र इत्यनेनवेधार्द्धयामावपिपापौहा।
णामेवास्तां तदावालस्यशीघ्रंमृत्युरित्यने
नकिंजातंदंडेशस्य पापत्वाभावेऽरिष्टमात्रंन
तुमृत्युरितदुक्तं यामार्द्धप्रहरेजन्मपापदं
डेथवापुनः लग्नेपापेयदाजातस्तदामृत्यु

अस्तुभेदंडसंयोगेसर्वत्रस्तुभवर्जिते
वालस्यमरणंशीघ्रंयदिपापैःसमन्वि
ते ३८ षट्पंचपरिवर्त्तेनदिवारात्रौ।
विधीयते पतयश्चार्द्धयामानांपूर्वाचा
र्यानुमानतः ३९ ॥ ॥ ॥ ॥

र्नसंशयः ३८ अथार्द्धयामाधिपानाहषडि
ति दिनेषट्संख्ययार्द्धयामेशाःस्युः पुनारात्रौ
पंचपंचसंख्ययार्द्धयामेशाभवंति एवमर्द्ध
यामानांपतयः पूर्वाचार्यैर्वारेशाः कथि
ताः तदुक्तं दिवाषट्कंक्रमेणैवरात्रौपंचक्र
मेणच वारेशादर्द्धयामानामधिपाःकीर्तितावुधैः
३९

पं·सु· तदेव स्पष्टयति रवाविति दिने रविवारे रविः
१२ सूर्यः एवं निजदिनात्स्ववारादारभ्य यामार्द्धया
मयोज्ञेयाः तथाहि यथा रवौ आदित्यवारे प्र
थमार्द्धयामस्य पतिरर्कः ततो द्वितीययामार्द्ध
स्य पतिः शुक्रः ततस्तृतीययामार्द्धस्य पतिर्बुधः
पुनश्चतुर्थस्येंदुः पंचमस्य शनिः षष्ठस्य गुरुः
सप्तमस्य भौमः अष्टमस्य दिवानाथः सूर्यः एवमे
व चंद्रादिवारे ज्ञेयमिति तदुक्तं अर्कः शुक्रो बुधश्चं

रवौ रविः सितो ज्ञश्च सोमो रविज एव च गु
रुर्भौमो दिवानाथो दिने यामार्द्धनायकाः
४· रविरात्रौ रविश्चादौ वाक्पतिश्चंद्रमाः
सितः भौमो दिनेशजो ज्ञो र्की रात्रौ यामा
र्द्धनायकाः ४८॥

द्रो मंदो जीवः कुजो रविरिति ४०॥ अथ रात्रौ
यामार्द्धेशानां क्रममाह रविरात्राविति रवि
वारे रात्रौ निशि प्रथमयामार्द्धस्य पतिः रविः।
द्वितीयस्य गुरुः तृतीयस्य शशी चतुर्थस्य शु
क्रः पंचमस्य भौमः षष्ठस्य दिनेशजः शनिः स
प्तमस्य ज्ञो बुधः अष्टमस्यार्को रविरेव एवं चंद्रा
दिवारे पि पंच पंच क्रमेण रात्रौ यामार्द्धपतयो भवंति तथा
चोक्तं अर्को जीवः शशी शुक्रः कुजो मंदो बुधो रविरिति ४८॥

रवि दिवा यामार्द्ध दंडेशौ					रवि रात्रौ यामार्द्ध दंडेशौ					चंद्र दिवा यामार्द्ध दंडेशौ					चंद्र रात्रौ यामार्द्ध दंडेशौ				
श	रा	बु	चं	१	र	शु	बु	चं	१	चं	र	रा	बु	१	चं	श	गु	मं	१
शु	मं	र	रा	२	गु	मं	र	शु	२	श	मं	र	रा	२	शु	बु	चं	श	२
बु	चं	शु	रा	३	चं	श	गु	मं	३	गु	चं	र	रा	३	मं	र	शु	बु	३
चं	र	रा	बु	४	शु	बु	चं	श	४	मं	र	रा	बु	४	श	गु	मं	र	४
श	मं	र	रा	५	मं	र	शु	बु	५	र	रा	बु	चं	५	बु	चं	श	गु	५
गु	चं	र	रा	६	श	गु	मं	र	६	शु	मं	र	रा	६	र	शु	बु	चं	६
मं	र	रा	बु	७	बु	चं	गु	श	७	बु	चं	र	रा	७	गु	मं	[illegible]	शु	७
र	रा	बु	चं	८	र	शु	बु	चं	८	चं	र	रा	बु	८	चं	रा	गु	मं	८
अर्द्ध यामेशा प्रथम दंडेशा	द्वितीय दंडेशा	तृतीय दंडेशा	चतुर्थ दंडेशा																

कुज दिवा यामार्द्ध दंडेशौ					कुज रात्रौ यामार्द्ध दंडेशौ					बुध दिवा यामार्द्ध दंडेशौ				
अर्द्धयामेश प्रथम दंडेश	द्वितीय दंडेश	तृतीय दंडेश	चतुर्थ दंडेश		अर्द्धयामेश प्रथम दंडेश	द्वितीय दंडेश	तृतीय दंडेश	चतुर्थ दंडेश		अर्द्धयामेश प्रथम दंडेश	द्वितीय दंडेश	तृतीय दंडेश	चतुर्थ दंडेश	
मं	र	रा	बु	१	मं	र	शु	बु	१	बु	चं	[illegible]	[illegible]	१
र	रा	बु	चं	२	श	गु	मं	र	२	चं	[illegible]	[illegible]	[illegible]	२
शु	मं	र	रा	३	बु	चं	[illegible]	[illegible]	३	श	[illegible]	[illegible]	[illegible]	३
बु	चं	र	रा	४	र	[illegible]	बु	चं	४	गु	[illegible]	[illegible]	[illegible]	४
चं	र	रा	बु	५	गु	मं	र	शु	५	मं	[illegible]	[illegible]	बु	५
श	मं	र	रा	६	चं	श	गु	मं	६	र	[illegible]	बु	चं	६
गु	चं	र	रा	७	शु	गु	चं	श	७	शु	मं	र	रा	७
मं	र	रा	बु	८	म	[illegible]	शु	बु	८	बु	चं	र	रा	८

पं.ख.
१३
13

बुध रात्रौ यामार्द्ध दंडेशौ					गुरु दिवा यामार्द्ध दंडेशौ					गुरु रात्रौ यामार्द्ध दंडेशौ					शुक्र दिवा यामार्द्ध दंडेशौ				
बु	चं	श	बृ	१	बृ	चं	र	श	१	बृ	मं	र	शु	१	शु	मं	र	श	१
र	शु	बु	चं	२	मं	[illegible]	श	बु	२	चं	श	बृ	मं	२	बु	चं	र	श	२
बृ	मं	र	शु	३	र	श	बु	चं	३	शु	बु	चं	श	३	चं	र	श	बु	३
चं	श	बृ	मं	४	शु	मं	र	श	४	मं	र	शु	बु	४	श	मं	र	श	४
श	बृ	मं	शु	५	बु	चं	र	श	५	श	बृ	मं	र	५	बृ	चं	र	श	५
मं	र	शु	बु	६	बृ	र	श	बु	६	बु	चं	श	बृ	६	मं	र	श	बु	६
श	बृ	मं	र	७	श	मं	र	श	७	र	शु	बु	चं	७	र	श	बु	चं	७
बु	चं	श	बृ	८	बृ	चं	र	श	८	बृ	मं	र	शु	८	शु	मं	र	श	८

शुक्र रात्रौ यामार्द्ध दंडेशौ					शनि दिवा यामार्द्ध दंडेशौ					शनि रात्रौ यामार्द्ध दंडेशौ				
शु	बु	चं	श	१	श	मं	र	श	१	श	बृ	मं	र	१
मं	श	शु	बु	२	बृ	चं	र	श	२	बु	चं	श	बृ	१
श	बृ	मं	र	३	मं	र	श	बु	३	र	शु	बु	चं	३
बु	चं	श	बृ	४	र	श	बु	चं	४	बृ	मं	र	शु	४
र	शु	बु	चं	५	शु	मं	र	श	५	चं	श	बृ	मं	५
बृ	मं	र	शु	६	बु	चं	र	श	६	शु	बु	चं	श	६
चं	श	बृ	मं	७	चं	र	श	बु	७	मं	र	शु	बु	७
शु	बु	चं	श	८	श	मं	र	श	८	श	बृ	मं	र	८

अथदंडेशानाह दंडेशाइति दिवसेदिवाअभीष्ट
यामार्द्धस्य चत्वारोभागाःकार्याः तेषांभागानामे
वशास्त्रेदराडइतिसंज्ञाकथिता तत्रयोयामार्द्धेशः
सएवप्रथमभागपतिः प्रथमदंडेशोज्ञेयः पुन
र्द्वितीयभागस्यतदर्द्धप्रथमदंडेशस्यसंख्यामर्द्ध
र्धिकृत्वा द्वितीयदंडेशोबोध्यः ततस्तदर्द्धेअर्थी
तत्संख्यामर्द्धीकृत्वा तृतीयदंडेशोज्ञेयः अयंभा
वः यथारविदिनेप्रथमयामार्द्धेशोरविः सए
वप्रथमदंडेशोज्ञेयः पुनर्द्वितीयदंडे तदर्द्धेराज्ञ

दंडेशादिवसेर्द्धोर्द्धेरात्रौषट्षट्क्रमःस्मृ
तः यामार्द्धेशादितोज्ञेयाएवंदंडेश्वरा
बुधैः ४२॥

रितिपुनस्तदर्द्धेबुधस्तृतीयदंडेशः तस्यबुधस्या
र्द्धेचंद्रश्चतुर्थदंडेशः एवंसर्वेषांयामार्द्धानांच
तुश्चतुर्भागप्रमाणंकृत्वा अर्द्धार्द्धक्रमेणदंडे
शाज्ञेयाः तथाचोक्तं वराहसूत्रे रवेरर्द्धेभवेद्राज्ञ
राहोरर्थेबुधस्तथा बुधस्यार्द्धेशशीज्ञेयश्चंद्र
स्यार्द्धेदिवामणिः १ भौमस्यार्द्धेतथासूर्यः गुरो
रर्द्धेहिचंद्रमाः शुक्रस्यार्द्धेकुजोज्ञेयः शनेरर्द्धे
तथैवच २ अथरात्रौदंडेशानाह। रात्रौषट्

पं॰स्व॰ ४८ 14

षट्संख्याः क्रमेण दंडेशाः ज्ञातव्याः कथमिति चेत्तदाह तथा रविरात्रौ प्रथमयामार्द्धपतिः सूर्यः स एव प्रथमदंडेशोपि ज्ञेयः तस्मात्षष्ठो द्वितीयदंडपतिर्ज्ञेयः एवं तस्मात्षष्ठः तृतीयदंडेशः एवमेव तत्षष्ठः चतुर्थदंडेशश्चेति अयंभावः यथा प्रथमदंडेशो रविस्तत्षष्ठः शुक्रः रात्रौ दिवार्द्धयामेशो रविरात्रौ यामार्द्धदंडेशश्चंद्रः दिवार्द्धयामेशदंडेशश्चंद्रः रात्रौ यामार्द्धदंडेशो द्वितीयदंडेशो भवति एवं शुक्रात्

रविदनुजबुधलग्नौ चंद्रसूर्यौ सुरज्ञाः कुजरविदनुजज्ञाश्चेंद्रसूर्यौ सुराश्च गुरुशशिरविदैत्याः शुक्रभौमार्कदैत्याः शनि॥ कुजरविदैत्याभंजते चाह्नि दंडान् ४२

षष्ठो बुधस्तृतीयदंडेशः तथैव बुधस्य षष्ठश्चंद्रः चतुर्थदंडेशो ज्ञेयः तदुक्तं स्वरपंचाशिकायां दिवार्द्धप्रहरक्रमेणैव ज्ञेया दंडेश्वरा बुधैः। निशायामार्द्धपात्षष्ठः षष्ठः क्षणदंडेश्वरा इति ४२॥ एतदेव स्पष्टयति मालिनीछंदसा रविदनुजबुधभावति आदावर्द्धयामेशं निश्चित्य ततो रविदनुजबुधभावित्यादिक्रमेण दिवा दंडेशा


त्तेयाः तदुक्तं रविशिखिबुधचंद्राश्चंद्रस्सूर्य
सुरत्ताः कुजरविजदनुजत्तात्तेंदुसूर्यसुराश्च
गुरुशशिरविदैत्याः शुक्रभौमार्कदैत्याः श
शिकुजरविदैत्याद्युदत्तणार्द्धेश्वराःस्युरिति ४३
अथरात्रौदंडेश्वरान् स्पष्टयति । रविसितबुध
चंद्रा इति प्रथममर्द्धयामेशंज्ञात्वा रविसित
बुधचंद्रा इत्यादिक्रमेण रात्रौदंडेशात्तेयाः ॥

रविसितबुधचंद्राश्चंद्रमंदेज्यभौमाः ।
कुजरविकविसौम्याः सौम्यचंद्रार्किजी
वाः गुरुकुजरविशुक्राः शुक्रसौम्येंदुमंदाः शनिगुरुकुजसूर्या दंडना।
थारजन्यां॥ ४४ ॥ ॥

तदुक्तं। रविभृगुबुधचंद्राश्चंद्रमंदेज्यभौमाः
कुजरविसितसौम्याः सौम्यचंद्रार्किपूज्याः ।
गुरुकुजरविशुक्राः शुक्रसौम्येंदुमंदाः शनि
गुरुकुजसूर्यारात्रिदंडेश्वरास्ते इति ॥ ४४॥

पं.स्व. अथात्रानुभूतोदाहरणं संवत् १८७७ शाके
१५ १७४२ तत्र चैत्रशुक्ल चतुर्दश्यां भौमे घट्यः
15 ३५।२० पूर्वाफाल्गुनीनक्षत्रे घ० ००।२३ गं
डयोगे घ० १।४५ गरकरणे एवं पंचांगोपेते
ऽह्निदिनप्रमाणं ३०।२८ तत्र मीनार्कगतां।
शा: १७ तद्दिने श्रीमार्त्तंडमंडलार्द्धोदयादिष्टं
४।०० तत्समये कस्यचिद्बालस्य जनिरासीत्
अस्य बालस्य जन्मलग्ने रवि बुध शनि राहु
केतूनां वेधोस्ति तथास्य जन्मसमये अर्द्धयामे
शो रविः स एव दंडेशः अतोस्य बालस्य त्वरिष्ट
बाहुल्यान्निश्चयेन मृत्युरिति ज्ञातं कथमरि
ष्टबाहुल्यमात्रेणेदं बोध्यम् अत्राचार्येण पा
पवेधे इत्यरिष्टमुक्तं तथैवार्द्धयामेशदंडे
शयोः पापत्वेप्युक्तं अत्र तु बहूनां पापानां
वेधोस्ति तथा वेधकारकाणां मध्ये सूर्योप्य
स्ति तस्यैवार्द्धयामदंडेशोस्तः तेनारिष्टबाहुल्य
तेयं एवं यत्र कुत्रचिदर्द्धयामेशदंडेशौ भूत्वा
पापग्रहो वेधं कुर्यात्तत्तत्र विशेषेणारिष्टं वक्त
व्यं अत्रारिष्टविषये दंडेशस्यातिप्राबल्यं ज्ञेयं
न त्वर्द्धयामेशस्यापेक्षा अनेन मूलग्रंथे आचा




मि
वृ
मे
मी
कुं
म
ध
तु
कं
सिं

पं॰ख॰ र्येण पापग्रहदंडेशे सति मृत्युरुक्तो तस्माद्दंडे
१६ शस्य प्राबल्याद्धेधे सत्यपि दंडेशेशुभे सत्यरिष्ट
16 मात्रं न तु मृत्युः तथैव वेधाभावे दंडेशस्यापि पा
पत्वे रिष्टं भुक्त्वा जीव्यात् अथास्य बालस्यारिष्टं।
बाहुल्यान्मृत्युर्भविष्यतीति ज्ञाते सति कदा भवि
ष्यतीत्यपेक्षायां कालो निर्णीयते अत्र वेधकार
का ग्रहाः सर्वे क्रूराः संति तथा च सबलाः संति ते
न मेषराशेर्मासा एव लब्धाः न तु वर्षाणि कति
मासा इत्यत्र विचारे जन्मलग्नं मेषाभिधानं तत्र
स्थान त्रयांक संख्या षोडश १६ तेन षोडश १६
मासा निर्णीताः पुनर्जन्मलग्ने भृगोराक्रमणमस्ति
अत्राचार्येण दंडेशस्य शुभत्वे तथा च सर्वत्र वेधा
द्वयाभे पापवर्जिते सति शुभ ग्रह समन्विते लग्ने
सति कुशलमुक्तं अत्र तु शुभग्रहस्य शुक्रस्या
क्रमणमेव तेन सर्वथा कुशलस्याभाव एव च
परं तु बलवतः शुक्रस्याक्रमणेन मासाः द्विगु
णिता जातास्तेन द्वात्रिंशन्मासा ३२ लब्धाः पु
नर्लग्नोपरि अबलस्य गुरोः पादमिता दृष्टिरस्ति
तेन गुरोः खलत्वात्स्थान त्रयांक मध्ये सन्निधि
स्थस्यैकस्यैव स्थानस्य चतुरंकाः ४ संख्या ल
ब्धाः तत्र दृष्टेः पादमितत्वान्मासमेकं लब्धं त।

स्याच्छयास्त्रिंशत्मितेमासेमृत्युसंभवोस्ति सवलेच
ग्रहेपापेदिनमात्रंविधीयते इतिवचनादेत३२
त्संख्यैर्दिनैः कुतोनमृत्युजीतः सूर्यस्यसवलत्वा
च्छनिराहुयुतत्वात्पापयुतवुधस्यापिपापत्वाद्वेति
अत्रोच्यते तत्वदृष्टिर्भवेद्वापितत्वयोगोभवेद्य
दि तदामासंविधातव्यंग्रहाणांचवलावलैरिति
वाक्याद्गुरुचंद्रयोर्दृष्टिसत्वाच्छुक्रेणयुतत्वात्पा
पानांमध्यवलत्वान्मासानांप्राप्तिः अतोमासे
मृत्युसंभवः सचकस्मिन्दिने अत्रमासेयदा
चंद्रोवेधकारकग्रहेणयोगंकरिष्यति यद्वा
कर्केतुलाराशौस्थितत्वातेषुवेधंकरिष्यति त
दामृत्युकालोनिश्चितः तदुक्तंनरपतौयद्दिनेवे
धयेस्तुंद्रस्तद्दिनेस्याच्छुभाशुभमितितस्मादयं
वालस्तुलग्नगतेचंद्रेवेधस्यप्राप्तित्वान्निधनंग
तः इतिप्रत्ययोजातः एवमेवयत्रकुत्रचिद्बा
लस्यजन्मलग्नेरिष्टसंभवोस्तितदामृत्युर्वीच्यः।
तस्यकालनिश्चयोप्येववेधकारकग्रहाणामा
क्रमणकारकग्रहाणांचतथाशुभाशुभग्रहाणा
मवलोकनादिवलावलत्वात्सम्यग्नेनसर्वंत्रज्ञेयं।
इत्युदाहरणम् ॥ ४४ ॥ ॥ ॥ ॥ ॥

पं.स्व. अथत्रिपताकीचक्रोक्तारिष्टप्रतिकारमाह द्वा
१७ भ्यांरक्तवस्त्रमितिखंडं शर्करापाषाणंपाषाण
17 पात्रेगोदुग्धपूरितं ७५ तदशक्तौप्रकारांतरमाह
प्रवालमितिप्रवालंविद्रुमंधान्यंवेधकारकग्रह
स्योक्तधान्यंचकाराद्दंडेशस्यापिधान्येतिलान्नं
तिलतंडुलानि ७६ ॥ ॥अथविशेषोक्तंयाम
लेरक्तवस्त्रंतथाखंडंपाषाणंधेनुदुग्धयुक् दद्या

रक्तवस्त्रंतथाखंडंपाषाणंक्षीरपूरितं दद्या
द्धेनुंहिरण्यंचपताकीरिष्टशांतये ७५ ॥
प्रवालमुक्ताधान्यंचलौहंवास्वर्णयुक्त।
कं तिलान्नंमुद्गधान्यंचशिशोर्मंगलदा
यकम् ७६॥

द्धेनुंस्वर्णंचगोधूमान्नंचतंडुलान् १ धान्यं।
मुद्गाश्चमाषाश्चतिलाश्चश्वेतसर्षपाः लौहंप्रवा
लकंताम्रंघृतंगव्यंस्वशक्तितः २ वेधकग्रहरू
पेणधान्यंमानेनवांशकैः वर्षीकाद्दस्तुमानं
चस्वर्णंज्ञेयंस्वशक्तितः ३ घृताद्दप्रमितंखंडंति
ललौहाश्चतद्गुणाः अथान्यद्विशेषमुक्तंकर्मवि
पाके कृत्वावेधेनसंपन्नंयाचितारमकिंचनं ४॥

४

ब्राह्मणं दातुमाहूय दानार्थी न ददाति यः वा
लानां हिंसकश्चैव वज्रधाव्याधिमान्भवेत्।
शूलादि दुष्टरोगाढ्यः सदा दुःखस्य भाजनः ५
पापग्रहकृतो वेधस्तं नित्यं पीडयेद्भृशं तच्छां
त्यर्थं त्रिशूलदानं वायुपुराणे कृष्णपक्षे च त
र्दश्यामष्टम्यां वा सिते तरे कुर्यात् द्वादशनिष्के
न त्रिशूलं लक्षणान्वितं सुवर्णमानं तु निष्कं च =तोला १
तुष्कः सौवर्णिकः षट्पंचाशदधिक शतद्वयम्
घो वा इति पक्षत्रयं तद्दशांशेन शक्त्या नित्यं भूमौ
निधाय संपूर्णं तिलताम्रविनिर्मितं पात्रमाढ सेर पक्का ४ [illegible]
कमानं स्यात् तत्र शूलं न्यसेद्बुधः ७ तत्र यथा
विधि गंधादिभिः संपूज्य स्वइप्रकाशिक वैदिक
मंत्रेण त्रिशूलाय नम इति नाममंत्रेण वा संपूज्य।
अघोरेभ्य इति मंत्रेण प्रणिपत्य द्विजं वृत्वा यथा
विभवं संपूज्य अद्येत्यादिदेशकालौ स्मृत्वा गो
त्राद्युच्चार्य्य नामांते अस्य शिशोस्त्रिपताकामम दुः
क ग्रहकृत लांबालसम्मुखवेधजनित पापग्र
हदंडाद्ययामेशसंसूचित दोषनिवृत्तिपूर्वक श
रीरारोग्य दीर्घायुः प्राप्तये इदं पाषाणपात्रं धे
नुदुग्धपूरितं धर्मराजदैवतं यथावाल्यमृत्युनिवृ
त्तये सौवर्णत्रिशूलं मृत्युंजयदैवतं घृतमग्निदैवतं

पं॰ स्व॰ ५८ 18

शर्करा वरुणदैवतं अन्नानि प्रजापतिदैवतानि वस्त्रं वृहस्पतिदैवतं सुवर्णमग्निदैवतं तिलान्नं ब्रह्मदैवतं लोहं शनिदैवतं प्रवालं भौमदैवतं ताम्रं सूर्यदैवतं सोपस्करं सदक्षिणं यथानाम गोत्राय ब्राह्मणायामुकवेदैकशाखाध्यायिने तुभ्यमहं संप्रददे ॥४६॥ ॥ अथ त्रिपताकीचक्रे वर्षारिष्टविचारमाह । मूर्त्तिजन्मभवमिति स्व

मूर्त्तिजन्मभवं लग्नं मध्यरेखास्थितं वदेत्
नवभिस्त्वहृते चंद्रो राहुभौमौ रसैस्तथा ४७

रूपवर्णं जन्मलग्नं मध्यरेखायां लिखेत् ततो जन्मवर्षादारभ्य वर्त्तमानवर्षपर्य्यंतं गणनाकार्या तत्रगतवर्षसमूहांके नवभिस्तष्टे सति शेषांकतुल्यराशौ जन्मचंद्राधिष्ठितराशितः चंद्रो लेख्यः पुनस्तस्मिन्नेवांके षड्भिस्तष्टे जन्मस्थानात् शेषांकतुल्यराशौ राहुभौमौ लेख्यौ राहुपदेन केतोरपि ग्रहणं ॥ ४७ ॥ ॥

शेषाइति। अन्येपिवुधगुरुभृगुरविशन
यश्चतुभिस्तष्टेशेषांकतुल्येपूर्ववद्ज्ञेया:
एवंवर्षेशुभाशुभंविचारणीयं अत्रराहुके
त्वोर्विपरीतेंगणनाकार्या एवंकेतुपताकां
विचारयेत् अथप्रकारांतरेण विशेषमाहग्र
थांतरेजनिवर्षसंघस्वविवाहादिजन्मलग्नमध्य
रेखासंख्यंकृत्वा भानिन्यस्यतत्रजनिगतवर्षैच
तुर्थेनसहिताजनिलग्नार्कीसंख्यारहिता अगु
शिखिनावथशरदंकलवेनसंयुतोत्रविधु: २ज

शेषाश्चत्वारिचत्वारिवर्षमेवशुभाशु
भं अपसव्येराहुकेतूकेतुचक्रंविचार
येत् ४८॥ ॥

न्मन्यैवविकल्पोन्यत्रयथासंभवंकृत्वास्थाप्या
श्चात्रखेटावेधोजनिभस्यतैश्चिंत्य: २ अस्या
र्थ: गताद्वानिजचतुर्लवेनसहितायेजन्मका
लिकारव्यादिका:खेटा: अर्थात् गताद्वसंख्या
चतुर्भिविभज्यशेषांकातुल्यराशौजन्मस्थरव्या
दिकाग्रहालेख्यास्तेनागुशिखिनौरहितौकार्यौ
अर्थादुत्क्रमेणलेखनीयौ एवमेवगताद्वानां
भवांशेनसहित:कार्य: अयंभाव:गताद्वसंख्यांन
वभिर्विभज्यलेखनीय: ॥४८॥ ॥ ॥ ।॥

अथवेधफलमाह। चंद्रराविति अस्यार्थः केतुप
ताकां चंद्रभौमौ यदा राहुशनी यदैकनाड्याम
र्थीत्परस्परं वेधकारकौ स्यातां तदा तत्काले त
स्मिन्वर्षे मरणं ज्ञेयं पुनः यत्रवर्षे जीवराहू ए
कनाड्यां वेधकारकौ भवेतां तत्रवर्षे कष्टं ज्ञेयमि
ति ॥४९॥ वृद्धिरिति। एवं शुभग्रहाणां परस्प
रं वेधे सति वृद्धिर्वाच्या च पुनः पापवेधेन हानि

चंद्रारौ राहुमंदौ च एकनाड्यां यदा खलु
तत्काले मरणं ज्ञेयं जीवराहू च कष्टदौ ४९
वृद्धिः शुभग्रहैर्वेधे हानिः पापैः परस्परं।
मिश्रैर्मिश्रं फलं वाच्यं चतुर्विंशतिवर्षतः
५०

वीच्या एवं युगयन्मिश्रग्रहैः परस्परं वेधे सति
मिश्रं फलं वाच्यं कथनीयं इदं चतुर्विंशोर्द्धम
पि विचारयेत्॥ अथ विशेषफलमुक्तं स्वर
पंचाशिकायां मंदेन पीडा रविणा तु भीतिः प्राण
र्थीनाशो रुधिरेण विद्धे निमीलनं राहुशिखि
वधेन स्याल्लाभसौख्यं शुभखेटवेधे १ उच्चा
दिपदसंयोगात्तारतम्यं फलं वदेत् द्वित्र्यादिभिः

शुभैर्वीच्यंहृष्टंपुष्टंशुभंतथा २ सुरगुरोर्य
दिराङ्गशिखिव्यधोभवतिमीलनमेवनसंश
यः यदिविधोश्च कुजैर्न्यसुरव्यधस्तदपिरु
गव्रणपीडनमृत्यवः ३ राहोर्वेधश्चेद्वला।
ढ्येन दृष्टो ऋक्षंविद्धंस्यात्तदामीलनंहिनोचे
दंगंशीतगुर्वीवलाढ्योविद्धोजीवोज्ञः सितांग
श्चचंद्रः ४ यदितनुभशशांकमृत्युमुथहास्व
वलपापविधुंतुदखेटविधाः भवतिनिधन
मेवतत्समायांयदिवलिनागुरुणानचेद्वे
धः ५ लग्नादिभावैरसुरादिविद्धैस्ततज्जदुः
खंप्रवदेन्मनीषी तत्तज्जसौख्यंसुरपूज्यपूर्वै
र्मित्रैर्विमिश्रंग्रहतत्वतः स्यात् ६ पीडामन।
स्तापमितादिवेधेसत्त्वक्षयः कीर्त्तिमानवाधा
स्त्रीहासुखेशुक्ररुजाचकष्टं राहोर्विलोमंसु
रराजपूज्ये ७ मुक्तावल्यां स्वर्भानुविद्धेहि
मगोत्तुकष्टंराहोर्विलोमंसुरराजविद्धे मही
जविद्धेतुशरीरपीडाशुभैश्चविद्धेजयसौख्यमु
क्तं शुभाशुभव्योमगवीथीतोत्रफलंचवर्षे
स्यवदेत्सुधीमानिति ॥५॥ ॥ ॥ ॥ ॥

॥ ॥ ॥ ॥ ॥ ॥ ॥

पं·स्व· अथमासेत्रिपताकीवेधविचारकारकमाह। मासइ
२· ति तत्रपूर्ववत्त्रिपताकीचक्रंनिष्पाद्यतस्मिन्मध्य
२० रेखायांमासलग्नंस्थापयित्वा तत्रपूर्वोक्तप्रकारेण।
रव्यादयोनवग्रहालिखनीया स्तदाचंद्ररावित्याद्यु
क्तप्रकारेणवेधंज्ञात्वाफलंवदेत् तत्रचंद्रस्थापनेवि
शेषः जन्मनिचंद्रनवांशकक्रमादनुलेख्यः अय
मर्थः जन्मनिचंद्रोयस्मिन्नवांशेस्थितस्तन्नवांशा
नुसारेणमासदिनभागंप्रकल्प्यलिखनीयः यथा

मासेमासेफलंचंद्रराशिभागैःप्रकल्प
ना चंद्रमाःपापविद्धोपिनष्टश्चेवतदाभ
वेत् ५।

जन्मनिचंद्रःकर्कीराशेःपंचमनवांशेतेनार्द्धमा
सेमासलग्नानुकूलभावस्थाप्राप्तिराशौलेख्यः मा.
सोत्तरार्द्धेतदग्रिमभावांकतुल्येराशौलेख्यः अ
त्रचंद्रःपापविद्धश्चेत्तदानष्टोभवेत् नेष्टकृत्फल
दोभवेत्यर्थः उक्तंच वर्षेमासेदिनेनाड्यांवे
धंज्ञात्वाफलंवदेदिति अत्रेयान्विशेषः जन्म
निदंडेशस्यपापत्वेसत्येवचलवर्षेमासेचवेधेस
तिमृत्युर्वाच्यः अन्यथादंडेशस्यपापत्वाभावेक
ष्टमात्रंकथयेत् अथचविस्पष्टोक्तिः चलव

मास प्रवेश दिन प्रवेश माह बोल के ज्यों पर्केक राशि कला चे ... यदा रविः तदा मास प्रवेशो ... प्रवेश ... समः

र्षे यदा वेधो दंडे शः पापसंभवः तदा मृत्युर्भवेन्नू
नमन्यथा कष्टमादिशेदिति ५१ इति पंचस्वर
प्रकाशिकायां त्रिपताकी प्रकरणं समाप्तिमगम
त् ॥ ॥ ४ ॥ ॥ चतुर्विंशतीति । चतुर्विंश
तिवर्षेभ्यः परमायुर्दायं विचिंतयेत् वक्ष्यमाण
प्रकारेणायुर्दायं विचारयेत् तदायुर्दायं साधा
रणाजनाः पुरुषा न जानंति यतो भवंति स्वयेनवि



चतुर्विंशतिवर्षेभ्य
मायुर्दायं विचिंत
येत् साधारणान
जानंति विषमं क
ठिनं ध्रुवं १ वरा
हाद्यैस्तत्वज्ञैर्यः
कृतो निर्णयः पुरा तदुद्देशेन वक्तव्यं कि
चिद्विज्ञायते मया २ ॥

षमं ज्ञातमशक्यं कृतो यतः कठिनमिति १ व
राहाद्यैरिति तत्वज्ञैर्वराहाद्यैराचार्यैः पुरा निर्ण
यः कृतः तदुद्देशेन तदनुसारेण मया किंचिज्ज्ञा
यते तद्वक्तव्यमिति २ ॥ ॥ ॥ ॥ ॥ ॥

पं·स्व· निश्चलस्येति । यथानिश्चलस्यतत्त्वंस्वभावाज्ज्ञा
२१ यते एवंरिष्टस्यनिर्णयंगुरूपदेशेनगम्यंगुरू
21 पदेशेनज्ञातुंयोग्यंअभ्यासेननचदृश्यतेनज्ञा
यते ३ ॥ अथजन्मलग्नात्सामान्यतोवर्षविचा
रमाह जन्मलग्नमिति जन्मकालादारभ्यगतव।
र्षांकेजन्मलग्नंसंयोज्य द्वादशाभिर्विभज्य शेषां
कतुल्यभावंवर्षलग्नंप्रकल्प्यतस्मात् भावग्र

निश्चलस्ययथातत्त्वंस्वभावाद्धिनिर्णयं ।
गुरोरुद्देशगम्यंचदृश्यतेचात्रनान्यथा ३
जन्मलग्नंसमारभ्यगतवर्षाणियोजयेत्
द्वादशेषुचभावेषुग्रहैर्वीच्यंशुभाशुभं ४

हानुसारेण तद्वर्षस्यशुभाशुभंवाच्यमिति त
थाचवर्षमासदिनशुभाशुभज्ञानार्थंसुदर्शन
चक्रमुक्तंसुदर्शनसंहितायां सुदर्शनंद्वादशा
रंजन्मभेंदुर्क राशितः वर्षमासदिनानांहिफलं
स्यात्परिकीर्त्तनात् १ व्यंत्यारिस्थैः सौम्यखेटैः पा
पैस्त्र्यापारिगैः शुभंकेंद्रकोणाष्टगोराहुः पापा
श्रांत्यैशुभामुदेर ॥ ४ ॥ ॥ ॥ ॥ ॥

तत्रतावद्वर्षेशप्रकारमाह। वर्षेस्वरादितितस्य
वर्षेस्वरादारभ्यनक्षत्रांकमानेनवत्सरंकल्पनी
यंज्ञातव्यं ततोवक्ष्यमाणप्रकारेणतत्स्वामिनं।
निश्चित्यज्ञात्वास्वामिवशेनफलंकल्पयेत् व
देदिति ५ अथवर्षारम्भविधानमाह कार्त्तिकां

वर्षेस्वरात्समारभ्यनक्षत्रांकविधानतः व
त्सरंकल्पनीयंचफलंतद्वच्चकल्पयेत् ५
कार्त्तिकांतेनवाहानिजन्ममासदिनावधि
दिनानिचैवमासस्थगतवर्षेनियोजयेत् ६

कार्त्तिकांतइति वर्षारम्भस्त्वात्रसावनः नचात्र
कार्त्तिकस्यैकविंशतिदिनोत्तरंजन्ममासदिना
वधिजन्मदिनपर्य्यंतंगणनाकार्या तत्रभुक्तमास
दिनानिवर्षेशफलेयोज्यानि पुनःकार्त्तिकशुक्लस
प्तम्यामग्रिमवर्षेस्वरम्भः ॥ ६ ॥ ॥ ॥ ॥

पं·स्व· अथ वर्षेश्वरज्ञानाय केतुपताकीन्यासमाह र
२२ विणेति सूर्यादारभ्य कृत्तिकादिगणनया त्रिराव
त्या वर्षेशः कल्पनीयः तद्यथा आदौ यस्य कृत्ति
22 कायां जन्म तस्य तस्य प्रथमवर्षेशो रविः द्विती
याद्दपश्चंद्रः ततो भौमस्ततो बुधस्तदग्रे शनिः पु
नर्जीवस्ततो राहुस्तदग्रे केतुः एवं नवमाद्दपोम्

रविचंद्रारबुधाश्चैव शनीज्यराहुकेतवः ।
अन्तेस्तु क्रास्त्रिरावृत्या कार्त्तिकादिक्रमाद्भवेत् ७

गुर्जीतः एवं पुनर्दशमवर्षादारभ्य रव्यादिगण
नाकार्यः एवं पुनः पुनः कल्पनीयं उक्तं च अ
र्केंदुभौमज्ञशनीज्यराहुः केत्वास्फुजिन्नग्निभतः
पताकां वारत्रयं विलिख्य केतोर्जन्मर्क्षतो वर्षपति
र्गताद्दैरिति अन्यदपि रचनावाक्यं चारिरवाभवध
ररव्यादिग्रह मंडल रविचंद्रमंगलबुधशनिगुरुराहुकेतुशु
क्रअंते जानि कार्त्तिकादि ऋक्षप्रागग्रवामावर्त्तै एकरभाग इति ७

अथवर्षेशदशाफलमाह । रविवर्षेदेशाभ्रमणंसं
तापः संतापाधिक्यंकांताज्वरशोकभयानि ८ चं
द्रेपुष्टिर्धृतिः संतोषस्तथारोग्यधनपुत्रादि ९ भौ

॥ अथकेतुपत्ताकीचक्रं ॥

स्व०	चं०	भौ०	बु०	रा०	जी०	रा०	के०	भृ०
कृ०	रो०	मृ०	आ०	पुं०	ति०	श्ले०	म०	पूफा०
उफा०	ह०	चि०	स्वा०	वि०	अं०	ज्ये०	मू०	पूषा०
उषा०	श्र०	ध०	श०	पूभा०	उभा०	रे०	अ०	भ०

रविणागम्यतेदेशः संतापोदेहपीडनं का
न्तारोगज्वरंशोकं करोतिचभयातुरं ८ चं
द्रेपुष्टिर्धृतिस्तुष्टिः सुखंसम्पत्तिरेवच आरो
ग्यंलभतेकामोधनपुत्रसमन्वितः ९ भौ
मेसदामर्मरोगः कार्य्यहानिर्भवेद्ध्रुवम् ।
दुष्टकर्मरतिर्नित्यंमनस्तापोदिनेदिने १०
बुधेवोधःपुत्रलाभः कार्यलाभोमहत्सुखं
राजसम्पत्तितोनित्यंधनलाभोदिनेदिने ११

मेकार्यहानिश्रमभयसंतापदुष्टकर्मरतयः १०
बुधेज्ञानपुत्रलाभसुखराजसम्मानधनलाभः ११

पं॰ स्व॰ शनैौरोगभयशोकवंधनक्षयार्थहानिप्राणना
२३ शाः १२ गुरौस्वर्णहारभूषणलोकपूजासुखधय
नागमाः १३ राहोरक्तस्त्रावविदेशगमनजलभ

२३

शनौरोगंभयंशोकंवन्धनंक्षयमेवच।
अर्थहानिरभाग्यंचप्राणनाशंकरोतिच १२
सर्वांगभरणंकंठेस्वर्णहारविभूषणं जीवे
वैराजसम्मानंलोकपूजाधनागमः १३॥
रक्तस्त्रावोभवेदंगेराहौदेहेजनस्यच वि
देशागमनंचैववह्निवारिभयंतथा १४
राजकार्यभयंचौर्य्यंगृहदाहोन्यबंधनं अ
वश्यंचभवेज्ञातःकेतोःसंवत्सरेपुनः १५
शुक्रेपौरषसत्व्यातिपुष्टिःसर्वंसुखानिच
मुक्तारत्नप्रवालादिधनलाभोदिनेदिने १६
रवौनखाः २॰ खशराः ५॰ शशांकेभोमेष्टयु
ग्मं २८ षट्शरा ५६ बुधेचशनौरामरामा ३३
गुरौत्रिषष्टिः ६३ खवार्य्येद्वैकाये ४॰ भगो
शून्यसप्त ७॰ ॥१७॥
यानि १४ केतोराजभयंचौर्यंगृहदाहवन्धनशास्त्र
घाता १५ शुक्रेपौरुषसत्व्यातिसुखमुक्तारत्नप्रवा
लादिधनलाभाः पूर्वाचार्य्यैरेतद्दशाफलंज्ञेयमित्युक्तं
१६ अथांतर्दशाप्रकारमाहरवाविति अद्वैकायेराज्ञ
केत्वोरित्यर्थः शेषंस्पष्टम १७॥ ॥

श्शुभं विधौ वुधे पि स्यान्मरणं राज्ञमंदयोः
गुरुश्शुक्रे महासौख्यं इंदुः एवं स्याक्षेमसूर्य
योः १८ दशा दशाहता कार्या दशापिंडवि
भाजिता लब्धं दिनादि वित्तेयं शोधं षष्टिह
तेपुनः १९ दशापिंडविभक्तं यल्लब्धमंत
र्द्दशाघटी एवं पलादि प्रत्यंतर्दशाह्यर्कादि
श्शुक्रमात् २० रविरवौ मरणं चैव रविचंद्रे त
थैव च रवौ भौमे मंदता च पापं रविवुधे त
था २१ संतापश्च चंद्रे चंद्रे लक्ष्मीः स्याच्चंद्र।
भौमयोः २२ अर्थांतर्दशाफलं॥ चंद्रेवु
धे च नाशस्स्यात्स्त्रीपीडा शशिनि शनौ २३
चंद्रेगुरौ प्रवासस्स्यात्लाभः स्याच्छशिदैत्ययोः
सर्वनाशश्चंद्रश्शुक्रे स्त्रीलाभश्चंद्रसूर्ययोः
२४ कुजे भौमे प्राणनाशो योधिक्ष्मयं कुजे वु
धे भौमे शनौ च शोकस्स्याच्छुभं स्याच्च कु
जे गुरौ २५ कुजे राहौ चाग्निभीतिः पीडा स्या
च्च कुजे भृगौ भौमे सूर्ये च चातुर्य्यं कुजचं
द्रे धनागमः २६ वुधे वुधे सुखं चैव सुखं।
स्याच्च वुधे शनौ वुधे गुरौ सुखं चैव वुधे राहौ
च सिद्धयः २७ वक्रिभं यं वुधे केतौ वुधेश्शु

चसिद्धयः बुधेसूर्येकीर्त्तिलाभौवुधेचंद्रे
चरोगिता २८ मंदताच वुधेभौमेशनौमंदे
चदुःखिता किंचित्सुखंशनौजीवेशनौरा
हौचदुःखिता २९ शनौभृगौसुखंचस्यात्
स्यादरिष्टंशनौरवौ शनौचंद्रेऽपमृत्युःस्या
द्देशत्यागःशनौकुजे ३० शनौवुधेसुखं
चैवसम्यक्ज्ञात्वाफलंवदेत् जीवेगुरौसु
खंचैवगुरुराहौचदुःखिता ३१ गुरौशुक्रे
चलाभःस्याद्गुरौसूर्येसुखंतथा गुरौचंद्रे
वियोगःस्याद्गुरौभौमेचसूरता ३२ सुखं
चैवगुरौसौम्येसुखंकिंचिद्गुरौशनिः रा
हौराहौचपीडास्याद्राहौकेतुगतेकलिः ३३
भृगौभृगौचकलहःकथ्यतेगणकोत्तमैः
